# Batukabhairava Mangalacharanam

# બટુકભૈરવ મઙ્ગલાચરણમ્

## Document Information

Text title : Batukabhairava Mangalacharanam

File name : baTukabhairavamangalAcharaNam.itx

Category : shiva, mangala

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : October 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 27, 2025

*sanskritdocuments.org*

# બટુકભૈરવ મઙ્ગલાચરણમ્

ભજન્તે યદ્ભર્ગપ્રભવભુવનાભોગભરિતં
પ્રભાભિર્ભાસ્વન્તં ભગવતિ ભવે ભાવિતતનુમ્ ।
ભયાર્ત્તા ભક્તા યં ભુવનભયભઙ્ગાય ભુવિ તં
ભજે ભવ્યૈર્ભાવૈર્ભવભયહરં “ભૈરવ”મહમ્ ॥ ૧॥

બિભેતિ ક્લેશોઽસ્માદથ જગદિદં ભીષણતમાદ્-
ભયં વિન્તે કિં વા ત્રિદિવપતયો બિભ્યતિ યતઃ ।
રવં ભીમં કૃત્વા દિતિજગણમામર્દયતિ યઃ
સ “ભૂતાનાં નાથઃ” કિરતુ કરુણાદૃષ્ટિકિરણાન્ ॥ ૨॥

સમૂહં દુઃખાનાં પરિહરિત યો ભૈરવવરો
ભિયા સર્વાન્ ભીરૂન્ રવયતિ તથા રોદયતિ ચ ।
બિભર્તિ સ્વાત્માનં ભરતિ ચ જગત્ સોઽતિમતિમાન્
વિધત્તાં “ભૂતાત્મા” મતિમતિતમાં તચ્ચરણયોઃ ॥ ૩॥

પ્રભુર્બાલો દીપ્તઃ સ્ફટિકસદૃશઃ કુન્તલરુચા
સ્ફુરદ્વક્ત્રો દિવ્યૈર્નવમણિગણૈર્ભૂષિતતનુઃ ।
ત્રિશૂલં દણ્ડં ચ સ્વકરયુગલે ધારણપર-
સ્ત્રિનેત્રો ભક્તેભ્યો વિતરતુ શિવં “ક્ષેત્રદ” ઇહ ॥ ૪॥

સદોદ્યત્સૂર્યાભસ્ત્રિનયનયુતઃ પાણિષુ દધન્
કપાલં શૂલં ચાભયવરદયુગ્મં સ્મિતમુખઃ ।
અલઙ્કારૈ રમ્યૈરપિ વિલસિતઃ શોણવસનઃ
ક્ષતાત્ત્રાતું સદ્યો ભવતુ સદયઃ “ક્ષત્રિય” વર ॥ ૫॥

સૃણિં ખડ્ગં પાશં ડમરુમભયં નાગમમલં
કપાલં ઘણ્ટાં ચ સ્વકરકમલૈર્બિભ્રદનિશમ્ ।
નૃમુણ્ડાનાં માલાં શશિશકલકં પિઙ્ગચિકુરાન્
દધાનો દિગ્વાસાઃ સકલસુખદાતાઽવતુ “વિરાટ્” ॥ ૬॥

શ્રીમદ્વિદ્યારણ્યયોગુરોઃ કારુણ્યકણિકાઞ્ચિતઃ ।
રુદ્રદેવઃ કૃતિમિમાં નિરમાત્ સર્વતુષ્ટયે ॥ ૭॥

॥ ઇતિ રુદ્રદેવત્રિપાઠીકૃતં બટુકભૈરવમઙ્ગલાચરણં સમ્પૂર્ણમ્ ॥

Notes:

Each verse has a specific name incorporated into its last line from the following Śloka શ્લોક from the ĀpaduddhārakaBaṭukaBhairavĀṣṭottaraśatanāmaStotraM (Rudrayāmalatantre Viśvāsoddhāre) આપદુદ્ધારકબટુકભૈરવાષ્ટોત્તરશતનામસ્તોત્રં (રુદ્રયામલતન્ત્રે વિશ્વસારોદ્ધારે) that can be accessed from one of the links given below.

Om̐ hrīṃ Bhairavo Bhūtanāthaśca Bhūtātmā Bhūtabhāvanaḥ .
Kṣetrajñaḥ Kṣetrapālaśca Kṣetradaḥ Kṣatriyo Virāṭ ..
ૐ હ્રીં ભૈરવો ભૂતનાથશ્ચ ભૂતાત્મા ભૂતભાવનઃ ।
ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલશ્ચ ક્ષેત્રદઃ ક્ષત્રિયો વિરાટ્ ॥

Proofread by Ruma Dewan

*Batukabhairava Mangalacharanam*
pdf was typeset on October 27, 2025

Please send corrections to *sanskrit@cheerful.com*